Roll No. : L 2 4 L 9 0 3 7 6 4

कुल प्रश्नों की संख्या : 18]
Total No. of Questions : 18]

[कुल मुद्रित पृष्ठों की संख्या : 12
[Total No. of Printed Pages : 12

# K-241090-B

## हाई स्कूल परीक्षा / High School Examination

## विषय : संस्कृत
## Subject : Sanskrit

समय : 3 घण्टे]
Time : 3 Hours]

[पूर्णांक : 75
[Maximum Marks : 75

**नोट :-** (i) सर्वे प्रश्ना: समाधेया:।

(ii) उत्तराणि सुन्दराणि सुस्पष्टनि च भवेयु:।

**सामान्य निर्देश :-**

| | | |
|---|---|---|
| प्रश्न-1 | सन्धि-विच्छेदं कृत्वा नामानि लिखत - | 2 |
| प्रश्न-2 | प्रत्यय योजित्वा वाक्यं पूर्ण लिखत - | 2 |
| प्रश्न-3 | अङ्कयो: संस्कृत भाषायां लिखत | 2 |
| प्रश्न-4 | वाच्यमवबोह्य नाम लिखत - | 2 |
| प्रश्न-5 | समास विग्रहं कृत्वा नामानि लिखत - | 3 |
| प्रश्न-6 | उपसर्ग चित्वा लिखित - | 3 |



FOR ALL PAPER SERACH ON GOOGLE -SCIENCE KA MAHAKUMBH

| | | |
|---|---|---|
| प्रश्न-7 | लकार परिवर्तनं कृत्वा लिखत - | 3 |
| प्रश्न-8 | गद्यांशस्य उत्तराणि - | 3 |
| प्रश्न-9 | गद्यांशस्य उत्तराणि - | 3 |
| प्रश्न-10 | श्लोकस्य उत्तराणि - | 3 |
| प्रश्न-11 | श्लोकस्य उत्तराणि - | 3 |
| प्रश्न-12 | प्रश्नोत्तराणि संस्कृत भाषाया लिखत - | 4 |
| प्रश्न-13 | प्रश्ननिर्माणं कुरुत - | 4 |
| प्रश्न-14 | स्वपाठ्यपुस्तकात चतस्त्रः सूक्ती लिखत / अथवा प्रदत्त सूक्तिनाम् हिन्दी भाषाया भावार्थ लिखत् | 4 |
| प्रश्न-15 | द्वौ सुभाषित श्लौकौ लिखत / अपूर्णो श्लौकौ पूरयत् - | 5 |
| प्रश्न-16 | (अ) स्व प्राचार्य प्रति अवकाशाय प्रार्थना पत्रम् संस्कृत भाषाया लिखत अथवा / पत्रे रिक्त स्थानानि पूरयन पूर्णम् लिखतु | 4 |
| | (ब) अपठित गद्यांश | 4 |
| प्रश्न-17 | द्वादश वाक्येषु संस्कृत भाषाया निबन्धं लेखनं कुरुत - | 6 |
| प्रश्न-18 | अ - उचितं शब्दं चित्वा लिखत - | 5 |
| | ब - उचितं विकल्पं चित्वा रिक्त स्थानानि पूरयत् - | 5 |
| | स - उचितं स्तम्भं सुमेलनं कुरुत - | 5 |

**प्रश्न-1** निम्नलिखितयो: रेखाङ्कित पद्यो: सन्धिविच्छेदं कृत्वा तयो: नाम्नी लिखत - **[1x2=2]**

(क) दीपक: पितराजं पालयति।

(ख) स: चिदानन्देन सह वार्ता करोति।



FOR ALL PAPER SERACH ON GOOGLE -SCIENCE KA MAHAKUMBH



**प्रश्न-2** निम्नरेखाङ्कित प्रकृति प्रत्ययौ परस्परं योजियत्वा वाक्यं सहितं लिखत – **[1x2=2]**

(क) व्यायाम (कृ + तुमुन) जना: उद्यानं गच्छन्ति।

(ख) सीता पठने (प्रवीण + टाप्) अस्ति।

**प्रश्न-3** निम्नलिखितयो: अङ्कयो: अनुवादं संस्कृत भाषयां कुरुत - **[1x2=2]**

(क) 105 (ख) 136

**प्रश्न-4** यथानिर्देशं वाच्यं परिवर्तयत - **[1x2=2]**

(क) त्वया पुष्पाणि चीयन्ते। (कर्तृवाच्ये)

(ख) शिव: पाठं पठति। (कर्मवाच्ये)

**प्रश्न-5** समास विग्रहं कृत्वा तेषां नामन्यपि लिखत - **[1x3=3]**

(क) चक्रपाणि:

(ख) यथाकामम्

(ग) घनश्याम:

**प्रश्न-6** अधोलिखितानि वाक्यानि संशोध्य लिखत - **[1x3=3]**

(क) भवान् कुत्र गच्छन्ति।

(ख) सुशीला पुस्तकं पठितवान्।

(ग) पय: मधुर: अस्ति।

**प्रश्न-7** निर्देशानुसारं लकारं परिवर्तनं कृत्वा लिखत - [1x3=3]

(क) बालकाय मोदकं रोचते। (लृट लकारे)

(ख) ते मिलन्तु। (लङ् लकारे)

(ग) वृध्द: अकथयत्। (लट् लकारे)

**प्रश्न-8** अधोलिखितं गद्याशं पठित्वा निर्देशानुसारेण प्रश्नानाम् उत्तराणि लिखत - [1x3=3]

सीमा-पित:! नगरे सर्वत्र दीपमालिकापर्वण: शुभागमने अग्निक्रीडनकानां पटापट शब्द! श्रूयते। अस्माकं गृहं न शोधितं न धवली कृतम्। मम सखीभि:तु प्रभूतेन धनव्ययेन क्रीतानि अग्नि क्रीडनकानि। इदानीं तु अहमपि पञ्चशतरुप्याकानां अग्नि-क्रीडनाकानि क्रेतुं इच्छामि।

प्रश्ना:

(1) 'प्रभूतेन धनव्ययेन' अनयो:पद्यो: विशेषणपदं किम्?

(2) 'अस्माकं गृहं न शोधितं न धवलीकृतम्' इति वाक्यस्य हिन्दी भाषया अनुवादं कुरुत।

(3) 'विक्रेतुं' इति पदाय अनुच्छेदे किं विलोम पदं प्रयुक्तम्?

**प्रश्न-9** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रश्नानाम् उत्तराणि लिखत - [1x3=3]

बिलासा स्वप्रयत्नेन ग्रामस्य विकास: कृतवती। तस्या: वर्धमानं प्रभावं दृष्ट्वा प्रतिवेशिन: राज्यानि तस्या: क्षेत्रे आक्रमणं कृतवन्त:। तै: सह बिलासा साहसेन युध्दम् अकरोत्। सा राज्यरक्षा कुर्वती वीरगतिं प्राप्तवती। राजा कल्याणसाय: मत्स्य आखेटकानां निवासस्थलं बिलासाया: सम्मानार्थं बिलासपुरम् इति नाम्ना प्रथितम्। वर्तमाने इदं बिलासपुरं छत्तीसगढाय न्यायधानी अस्ति।



FOR ALL PAPER SERACH ON GOOGLE -SCIENCE KA MAHAKUMBH



प्रश्ना:

(1) 'प्राप्तवती' इति क्रियापदस्य कर्तृपदं किं?

(2) 'सा' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(3) 'तै: सह बिलासा साहसेन युध्दम् अकरोत।' अस्य वाक्यस्य हिन्दी भाषया अनुवादं लिखत।

**प्रश्न-10** अधोलिखितं श्लोकं पठित्वा निर्देशानुसारेण उत्तरत - [1x3=3]

श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत्।
घृत्या द्वितीयवान्भवति राजन् बुध्दिमान्वृध्दसेवया॥

प्रश्ना:

(1) केन श्रोत्रियो भवति?

(2) 'बुध्दिमान्वृध्दसेवया' अस्य पादस्य हिन्दी भाषया अनुवादं लिखत।

(3) "तपसा विन्दते महत्" अस्मिन् वाक्ये क्रियापदं किम्?

**प्रश्न-11** अधोलिखितं श्लोकं पठित्वा निर्देशानुसारेण उत्तरत - [1x3=3]

अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विध्या:।
सारन्ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाऽम्बुमध्यात्॥

प्रश्ना:

(क) 'अनन्तपारं किल शब्दशास्त्रम्' इति वाक्ये विशेषणपदं किम्? चित्वा लिखत्।

(ख) मनुष्यै: केन सदृशं सारं ग्राह्यम?

(ग) "हंसैर्यथा क्षीरमिवाऽम्बुमध्यात्" इति वाक्यस्य हिन्दी भाषया अनुवादं कुरुत्

**प्रश्न-12** अधोलिखितानां प्रश्नानामुत्तराणि संस्कृत भाषायां लिखत – (कोऽपि चतुष्टयम्) [1x4=4]

(क) कोरबा नगरं किमर्थं प्रसिध्दम्?

(ख) तृणानां केन सह विरोध: अस्ति?

(ग) कस्माद् बुध्दिनाशो भवति?

(घ) बिलासाया: विवाह: केन सह अभवत्?

(ङ) अस्माकं कर्त्तव्यं किम्?

(च) पुत्रं दुष्टुं क: प्रस्थित:?

**प्रश्न-13** अधोलिखितेषु वाक्येषु रेखाङ्कित पदमाधृत्य प्रश्न निर्माणं कुरुत (कोऽपि चत्वार:) [1x4=4]

(क) शिविना विना इदं दुष्करम्।

(ख) स्वामी आत्मानन्दस्य बाल्यकालस्य नाम तुलेन्द्र: आसीत्।

(ग) बृहस्पति: देवानां गुरु:मन्यते।

(घ) चौरस्य पाद ध्वनिना अतिथि: प्रबुध्द:।

(ङ) हस्तप्रक्षालनार्थम् ऋतम् अस्ति।



FOR ALL PAPER SERACH ON GOOGLE -SCIENCE KA MAHAKUMBH



**प्रश्न-14** स्वपाठ्यपुस्तकात् चतस्र: सूक्ती: लिखतया: प्रश्नपत्रेऽस्मिन् नागता: स्यु:। [1x4=4]

**अथवा**

अध: प्रदत्तसूक्तीनां हिन्दी भाषया भावार्थं लिखत -

(क) संमोहात् स्मृतिविभ्रम:।

(ख) छिद्रेष्वनर्था: बहुली भवन्ति।

(ग) निशान्ते च पिबेत् पय:।

(घ) नास्ति त्यागसमं सुखम्।

**प्रश्न-15** स्वपाठ्यपुस्तकात् कौचित् द्वौ सुभाषित श्लोकौ लिखत। [2½x2 =5]

**अथवा**

अध: द्वौ अपूर्णौ सुभाषित श्लोकौ प्रदीयते, तौ श्लोकौ स्वपाठ्यपुस्तकाधारेण पूरयत –

(क) सर्वा विद्या: पुरा प्रोक्ता: ______।
______ संस्कृतं कामधेनुवत्॥

(ख) शैले शैले न माणिक्यं ______
______ चन्दनं न वने वने॥

**प्रश्न-16** (अ) भवत्या नाम खुशी अस्ति। भवती स्वमातुलस्य परिणयोत्सवे ग्रामं गन्तुमिच्छति। अत: अवकाशाय स्व-प्राचार्यं प्रति संस्कृत भाषया प्रार्थना पत्रं लिखत्। [1+2+1 =4]

**अथवा**

भवान बीजापुर नगरे स्थित: विश्वजीत:। भवत: मित्रं आनन्द: कश्यप: कोरिया नगरे वसति। तं परीक्षायां सफलतायै वर्धापन-पत्रं। कोष्ठक प्रदत्त पदानां सहायतया पुन: लिखत। [½x8=4]
(अपश्यम्, विश्वजीत:, आगत:, तुभ्यम्, अधिकतरा, तत्रास्तु, बीजापुर नगरत:, आनन्द:)

स्थानम् __(i)__

दिनाङ्क:

26.11.2023

प्रिय मित्र __(ii)__

अत्र कुशलं __(iii)__। अद्यैव तव परिणाम: __(iv)__। तव सफलतां ज्ञात्वा मम मनसि महती प्रसन्नता जाता। मम एषा प्रसन्नता __(v)__ जाता यदा अहं तव नाम योग्यता-सूचौ __(vi)__। त्वया पञ्चशतम् अंङ्का: प्राप्ता:। त्वं निश्चित रूपेण छात्रवृत्तिं प्राप्स्यसि। त्वया परिवारस्य विद्यालयस्य च नाम उज्जवलीकृतम्।

अस्याम् उज्जवल-सफलतायाम् अहं __(vii)__ हार्दिक वर्धापनं यच्छामि उज्जवल भविष्याय च कामये। मातृपितृ चरणेषु प्रणाम:।

तव मित्रम्

__(viii)__



FOR ALL PAPER SERACH ON GOOGLE -SCIENCE KA MAHAKUMBH



(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृत भाषया उतरत:- [1x4=4]

मातृभूमि: बहुविधै: द्रव्यै: अस्मान् उपकरोति। तस्यै अस्माकमपि कर्तव्यं यत् वयं कायेन, मनसा, वाचा धनेन च स्वमातृभूमे: उन्नतिं कुर्याम्। देशाय अस्माकं देशवासिनां हृदयेषु प्रेम भवेत्। मातृभूमिं प्रति सम्मानं भवेत्। अतएव कथितम् "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

प्रश्ना:

(क) का अस्मान् उपकरोति?

(ख) वयं कस्या: उन्नतिं कुर्याम?

(ग) मातृभूमिं प्रति किं भवेत्?

(घ) अस्माकं देशवासिनां हृदयेषु किं भवेत?

**अथवा**

(क) गद्यांशस्य उपयुक्त शीर्षकं चिनुत? [1]

(ख) गद्यांशस्य सारांशीकरणं कुरुत? [3]

**प्रश्न-17** अध: प्रदत्त विषयेषु कमपि एकमधिकृत्य संस्कृत भाषया द्वादशवाक्यै: निबन्धं लिखत – [½x12 =6]

(क) बीटा (क्रिकेट)

(ख) पर्यावरणम्

(ग) मम दिनचर्या

(घ) प्रिय कवि : कालिदास:

**प्रश्न-18** (अ) उचितं विकल्पं चित्वा लिखत – [1x5=5]

(i) श्वादपि उच्चतर: -

(क) वृक्ष:

(ख) पिता

(ग) पर्वत:

(घ) ग्रह:

(ii) 'मया' शब्दे विभक्ति: अस्ति -

(क) प्रथमा

(ख) द्वितीया

(ग) तृतीया

(घ) चतुर्थी

(iii) 'पुनरास्ते' पदस्य संधि: विच्छेद: अस्ति -

(क) पुन: + आस्ते

(ख) पुनरा + स्ते

(ग) पुन + रास्ते

(घ) पुनरा + ते



FOR ALL PAPER SERACH ON GOOGLE -SCIENCE KA MAHAKUMBH



(iv) 'लभमान:' इत्यस्मिन् शब्दे प्रत्यय: अस्ति -

(क) शानच्

(ख) शतृ

(ग) क्त

(घ) क्तवतु

(v) 'राम: ह्य: विद्यालयं गतवान्' इति वाक्ये अव्यय अस्ति-

(क) राम:

(ख) ह्य:

(ग) विद्यालयं

(घ) गतवान्

**प्रश्न-18** (ब) उचितं स्तम्भं सुमेलनं कुरुत - [1x5=5]

| | (अ) | (ब) |
|---|---|---|
| (1) | प्राणेश्योऽपि प्रिय: | चतुर्थी विभक्ति: |
| (2) | अभिनन्देत् | ब्रह्म |
| (3) | नम: योगे | सुहृद् |
| (4) | ओदनस्य मुखम् | अव्यय: |
| (5) | सर्वत्र | उपसर्ग: |

**प्रश्न-18** (स) उचितं विकल्पं चित्वा रिक्त स्थानानि पूरयत वाक्यं पुनः लिखत- [1x5=5]

(विवादेन, व्याकरणं, पीडितोऽस्ति, रैंगलर, विदुषा)

(1) _______ तु भाषायाः आधारः।

(2) अलम् _______।

(3) विद्वस् तृतीया एकवचने _______ भवति।

(4) कैम्ब्रिज विश्वविद्यालयस्य _______ फेलोशिप प्राप्तवानसौ।

(5) ज्वरेण _______।

***********

FOR ALL PAPER SERACH ON GOOGLE -SCIENCE KA MAHAKUMBH